# किं कृत्वा ?

बालकः → पुस्तकं पठति → पाठशालां गच्छति च ।






बालकः पुस्तकं **पठित्वा** पाठशालां गच्छति ।

---

माता → पाकं करोति → भोजनं परिवेषयति च ।





माता पाकं **कृत्वा** भोजनं परिवेषयति ।

> पठित्वा, कृत्वा इत्येतानि पूर्वकालवाचक-त्वान्त-अव्ययानि ।

---

अद्वैतः → वृक्षम् आरोहति → उपविशति च ।





अद्वैतः वृक्षम् **आरुह्य** उपविशति ।

---

वृद्धा → देवं प्रार्थयते → निद्रां करोति च ।





वृद्धा देवं **प्रार्थ्य** निद्रां करोति ।

> आरुह्य, प्रार्थ्य इत्येतानि पूर्वकालवाचक-ल्यबन्त-अव्ययानि ।

शुभदा ⟶ आपणं गच्छति ⟶ धनं ददाति ⟶ पुस्तकम् आनयति ⟶ पठति च।




शुभदा आपणं **गत्वा** धनं **दत्त्वा** पुस्तकम् **आनीय** पठति।

**वाक्यानि निरीक्ष्य भेदम् अवगच्छत –**

१. साधवः फलानि **दत्त्वा** निर्गच्छन्ति। ⟶ १. साधवः फलानि **प्रदाय** निर्गच्छन्ति।

२. वृद्धा देवं **नत्वा** कार्यम् आरभते। ⟶ २. वृद्धा देवं **प्रणम्य** कार्यम् आरभते।

३. आरक्षकाः चौरं **ताडयित्वा** कारागृहं नयन्ति। ⟶ ३. आरक्षकाः चौरं **सन्ताड्य** कारागृहं नयन्ति।

४. धनं **हत्वा** चौरः पलायितः। ⟶ ४. धनम् **अपहृत्य** चौरः पलायितः।

सम्भाषापत्रम्



**१. मेलनं कुरुत।**

| | |
|---|---|
| खादति | सम्मिल्य |
| पिबति | स्मृत्वा |
| सम्मिलति | खादित्वा |
| स्मरति | प्राप्य |
| प्राप्नोति | पीत्वा |

**२. गणद्वये लिखत।**

उक्त्वा, पूजयित्वा, सम्पद्य, संहृत्य, धृत्वा, धावित्वा, प्रविश्य, स्नात्वा, उड्डीय, निमज्ज्य, अवतीर्य, उत्थाय, आरुह्य, उत्पत्य, सिक्त्वा, स्थित्वा, चलित्वा, निष्पीड्य, उद्घाट्य, निष्कास्य

**३. पूर्वकालवाचकयोः उपयोगं कृत्वा दीर्घं वाक्यं कुरुत।**



मर्कटः वृक्षात् -----पेटिकां-----टोपिकां ----- मस्तके ------ वृक्षम् आरोहति।

**क्रीडा – पूर्वकालवाचकयोः उपयोगं कृत्वा अतिदीर्घं वाक्यं वदत।**



**पठत बोधत !** योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत् तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥



पादौ हस्तौ जानुनी द्वे उरश्चाथ ललाटकम्।
अष्टाङ्गेन स्पृशेद् भूमिं साष्टाङ्गप्रणतिश्च सा॥

आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने।
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते॥

# किं कर्तुम् ?










युवकः चित्रपटगृहं गच्छति चित्रपटं पश्यति च।

युवकः किमर्थं चित्रपटगृहं गच्छति? युवकः चित्रपटं **द्रष्टुं** चित्रपटगृहं गच्छति।







बालकाः गृहम् आगच्छन् जलं च अपिबन्।

बालकाः किमर्थं गृहम् आगच्छन् ? बालकाः जलं **पातुं** गृहम् आगच्छन्।

- छात्रौ पुस्तकालयं गच्छताम्। **किमर्थम्**? छात्रौ **पठितुं** पुस्तकालयं गच्छताम्।
- मेघा फेनकं स्वीकरोति। **किमर्थम्** ? मेघा वस्त्राणि **प्रक्षालयितुं** फेनकं स्वीकरोति।

द्रष्टुं, पातुं, पठितुं, प्रक्षालयितुम् इत्येतानि हेत्वर्थक-तुमन्त-अव्ययानि ।

**पठत अवगच्छत च –**

१. शुनकाः **खादितुम्** इच्छन्ति। २. अहं **वक्तुम्** ऐच्छम्। ३. भारवाहकः भारं **वोढुं** शक्नोति। ४. ताः नार्यः रुचिरं **पक्तुं** शक्नुवन्ति। ५. जनाः भोजनं **कर्तुम्** आरभन्त।

**सम्भाषापत्रम्**



**१. चतुर्थं पदं लिखत।**

१. त्रै-त्रातुम् :: गै – ________ २. मिल्-मेलितुम् :: लिख् – ______

३. पूज् – पूजयितुम् :: कथ् – ______ ४. हन् – हन्तुम् :: मन् – ________

५. लभ्-लब्धुम् :: रभ् – ________ ६. दृश्-द्रष्टुम् :: स्पृश् – ________

CF87NB

**२. धातोः हेत्वर्थकम् अव्ययं प्रयुज्य वाक्यं पुनर्लिखत।**

१. शृगालः द्राक्षाफलम् (खाद्) उत्पतति। २. काकः जलं (पा-पिब्) घटे उपविशति।

३. शृगालः मांसखण्डं (लभ्) काकस्य स्तुतिं करोति। ४. भीमं (हन्) दुर्योधनः कपटम् अकरोत्।

५. शशकः निद्रां (कृ) अगच्छत्। ६. सः पत्रं (लिख्) लेखनीं स्वीकरोति।